बह्वी :बह्वी :कर्तुं नाद्रियेत। कथं तथेष्टमेतत्। इह लोकेऽपि ब्रह्मणा वृहता वीर्यवता इत्यर्थः। तेन यजुर्मन्त्रेण एता इष्टका : कुरुते मन्त्रसामर्थ्यादल्पस्य बहुभवनं श्रूयते। तथा च तैत्तिर :एकादिपरार्द्धान्तसंख्याकाीया श्रुति - : 'धान्यमसि धिनुहि देवान् इत्याह। एतस्य यजुषो वीर्येण। यावदेका देवता कामयते यावदेका। तावदाहुतिप्रथते। न हि तदस्ति। यत्तावदेव : अथ यत्संतनोति - स्यात्। यावज्जुहोति इति। मन्त्रे एका च दश च इत्यादिना उत्तरोत्तराधिकसंख्या सन्तानस्य फलमाह कामानेव तत्संतनोति।। अयंभावददाति यजमानः। परन्तु :स्रवेण स्वल्पमेवाज्यं तत्तदाहुतौ देवेभ्य :यज्ञादौ वयं पश्याम : संकोचश्च कल्प्यते। :प्रभूतो जायते। मन्त्रशक्त्या वस्तुषु विकास :मन्त्रस्य तादृशी शक्तिरस्ति यया शक्त्या स्वल्पोऽपि पदार्थ अद्यतनीये युगे मन्त्रविज्ञानसय रहस्य स्फोटकन :कश्चन विद्वान् भवति। प्रायेण अस्मिन् कस्मिन्काले मन्त्रस्य तात्पर्य जना : सावधानेन भावने मन्त्रस्य :। अत:जानन्ति उच्चारणमात्रेण कार्यसिद्धिर्मन्यते। तत्रापि उच्चारणे भवन्ति केचन दोषा परम्परया अध्ययनं कृत्वा रहस्यं चोद्घाटयेत्। अस्मिन् देशेअनेके मनीषिण ।:आसन् प्रयोगनिपुणा :

स यदाहैका च दश चान्तश्च परार्धश्चेति वाग्वा एका वाग्दश वागन्तो :कुरुते। वाग्वा अयमग्निर्वाचा हि चित :यद्वेवेष्टका धेनू" वाक्परा| वाचमेव तद्देवा धेनुमकुर्वत तथैवैतद्यजमानो वाचमेव धेनुं कुरुतेऽथ यत्सन्तनोति वाचमेव तत्संतनोत्येतामेऽ अग्नऽइष्टका धेनवः सन्त्वमुत्रामुर्ष्मिल्लोके इत्येतद्वा एना सिल्लोके धेनूकुरुते तथो :कुरुतेऽथैना एतदमुष्मिल्लोके धेनू : हैनर्मता

उभयोलोकयो अन्त्यस्मॅश्चामुष्मिंश्च।।"[141] अयं भावमन्त्ररूपया वाचा चितत्वादग्निर्वागात्मकः। एकत्वादिका च संख्या : वाचा प्ृरकाश्यमानत्वात् वागात्मिका। एवं च सति: अग्न्यवयीभूतानाष्टिकानाम् 'एका च दश च' इत्यादिसंख्या प्रकाशकेन मन्त्रेण देवा वाचम् एव धेनुम् अकुर्वन्। अत इदानीन्तनोऽपि यजमानतद्वदेव करोति। एकत्वादिसंख्याना : वागात्मकत्वादुत्तरोत्तराधिक संख्या संतानेन वाचमेव भूयसीमविच्छिन्नां सम्पादितवान् भवतीत्याह अथेति। ननु च इमा मे अग्न इष्टका धेनवः सन्तु इत्यनेन धेनुरूपत्वसंपादनात् पुनरपि तदेव इत्यादिना सम्पाद्यत इति पौन "एता मे अग्ने" :अस्मिँल्लोके इह लोके धेनू :रुक्त्याशंकां निवारयति एतद्वा इति। इमा मे अग्ने इत्येतेनैता इष्टकाकरोति। अथ 'एता मे अग्ने' इत्यनेन अमुष्मिँल्लोके स्वर्गे धेनू। इष्टकानां लोकद्वयेऽपि :करोति। अतश्च पृथगर्थत्वान्न पुनरुक्तिरिति भाव : अपि :अस्मिंश्चामुष्मिश्च इति उभयोर्लोकयो :इष्टकारूपा धेनव :धेनुरूपतासम्पादनस्य फलमाह तथो हेति। तथा सति एता एवम् यजमानं भुञ्जन्ति पालयन्तीत्यर्थः। हे अग्ने इमा इष्टका इहलोके एकत्वादिपरार्द्धान्तसंख्याविशिष्टा धेनवः न केवलं हि इह लोक एव किन्तु हे अग्ने अमुत्रेत्येतत्पदं मन्त्रं एव विवृणोति अमुष्मिल्लोक इति। तत्रापि एता इष्टका मे धेनवः सन्तु इति मन्त्रार्थः।

शतपथब्राह्मणस्य एकादशे काण्डे जनकयाज्ञवल्क्ययो अग्निहोत्रसंबन्धेऽस्ति। :संवाद :जनको इ वैदेहः। बहुदक्षिणेन यज्ञेनेजे स ह गवां सहस्रंमवरुन्धन्नुवाचैता वो ब्राह्मणा यो ब्रह्मिष्ठः स उदजतामिति।। स होवाच। याज्ञवल्क्योऽर्वाचीरेताऽ " इति ते हाचुस्त्वं खिन्नो याज्ञवल्क्य ब्रह्मिष्ठोऽसी उ इति स होवाच नमोस्तु ब्रह्मिष्ठाय गोकामा एव वयं स्म ऽ इति।[42]

अयमत्र विशेषप्राणशब्दाभिधेय परमात्मरूपतां विजिगीषु कथामुखेन :अग्निहोत्रदर्श पूर्णामासादियागदेवतानां तत्वत : आख्यायिकां प्रस्तौति। विदेहदेशानां राजा वैदेहः। बहुदक्षिणेनेति। सहस्रसर्वव :विवक्षुर्दसदक्षिणेनेत्यर्थः। यज्ञेन ईजे इष्टवान्। स ह गवामित्यादि। सयुष्माकं :व :गवां सहस्रं यज्ञसंभाराय अवरुन्धन् स्थापयन्नुवाच। हे ब्राह्मणा :खलु जनक : उदजतां उत्क्षिपतु स्वगृहं गमयत्वित् :सहस्रसंख्याकागा :ब्रह्मनिष्ठो विद्यातिशयवान्। स एता :मध्ये यो ब्रह्मिष्ठयर्थः। स एवं राज्ञो वाक्यमाकर्ण्य याज्ञवल्क्यो मदीयं गृहं प्रति एता गाव :गा :एता :अस्मदभुखा :प्रस्थापनीया इत्युक्तवानिति। अर्वाची : :उदजतामित्यनुषंगः। एतत् याज्ञवल्क्य श्रुत्वा क्रुद्धानां अन्येषां ब्राह्मणानां वचनं दर्शयति त्वं स्विदिति हे याज्ञवल्क्य न अस्माकं मध्ये त्वं स्वित् स्वित् इति वितर्के। त्वं किम्। ब्रह्मिष्ठोसि ब्रह्मवित्तमोऽसि इति निन्दायां प्लुतिः। एवमधिक्षिप्ते सति याज्ञवल्क्येन यदुक्तं तद्दर्शयति युष्माकं मध्ये ब्रह्मिष्ठाय नमोऽस्तु। गो कामा एव वयं केवलं स्म भवाम इति। :

अनेन प्रकारेण गवां महत्वमत्रापि प्रकटितम्। अग्निहोत्रमध्ये गौप्रमुखा भवति। गां विना अग्निहोत्रस्य अनुष्ठानं कथं : क्रोधात् उद्विग्नो नानाविधिं प्रश्न चकार। :स्यात्। ब्रह्मिष्ठस्य याज्ञवल्क्यस्य शाकल्येन सह संवादोऽत्र भवति। शाकल्य :आसीत् यदयं याज्ञवल्क्य :शाकल्यस्य मनसि क्लेशअस्मासु श्रेष्ठः कथं भवति। अस्माकं मध्ये आत्मानं कथमयं ब्रह्मिष्ठेन साधितवान्। वयमपि अधीत विद्या। तस्मात् द्वेषपूर्वकं याज्ञवल्क्येन सह शास्त्रार्थं चकार। देवताविषये अनेके: प्रश्नातेन : तेषां सर्वेषां शास्त्रसम्मतं उत्तरमसौ ददौ। किन्तु :शाकल्येन उत्थापिताक्रुद्धदेवतातिरिक्तान् प्रश्नान् प्रपच्छ। इति :शाकल्य : शापं तस्मै प्रायच्छत् यद् देवतानां तिरस्कारात् क्रोधाच्च झटिति तव मृत्युभविता तथा अस्थीन्यपि तव :श्रुत्वा याज्ञवल्क्य अस्थीन :पुत्रादयो न प्राप्स्यन्ति। सद्य एव तस्य शाकल्यस्य मृत्युरभवत्। तस्य शिष्याि एकीकृत्य वस्त्रमध्ये ररक्षुपरन्तु : चौरास्तावत् स्वर्णबुद्ध्या अस्थीनि नीत्वा जग्मुः। अस्य प्रसंगस्य मूले इदमस्ति यद् ब्रह्मिष्ठस्य तिरस्कारो न विधेयः। सेवा स्वगृहं आनीतवान्। :सहस्रं गा :सदा कर्तव्या। ब्रह्मिष्ठः याज्ञवल्क्य ज्ञानिनां सम्माननं मधुपर्कैः गोदानैश्च पुराकाले भवति स्म। इदानीमपि गौः अस्माभि पूज्यते। :

द्वादशे काण्डे अग्निहोत्रमध्ये गोसंबन्धीप्रायश्चितं वर्णितम् तद्यथा –

यस्याग्निहोत्रं दोह्यमानं स्कन्देत्। किं तत्र कर्म। का प्रायश्चित्तीरिति अद्भिरुपनिनीय परिशिष्टेन स्कन्नप्रायश्चितेनाभिमश्"य। जुहुयात्। यद्युनीचीस्थाली स्यात्। यदि वा भिद्येत। स्कन्नप्रायश्चित्तैनैवाभिमृश्य अद्भिरुपनिनीय। यदन्यद्विंदेत् तेन जुहुयात्।।

**यस्याग्निहोत्री दोह्यमानोपविशेत् किं तत्र कर्म का प्रायश्चित्तिरिति।**

**यस्याग्निहोत्री दोह्यमाना वाश्येत किं तत्र कर्म का प्रायश्चित्तिरिति।**

**यस्याग्निहोत्री लोहितं दुहीत किं तत्र कर्म का प्रायश्चित्तिरिति।**

**यस्याग्निहोत्रन्दोह्यमानममेध्यमापद्येत किं तत्र कर्म का प्रायश्चित्तिरिति।**

**यस्याग्निहोत्रन्दोहितममेध्यमापद्येत किं तत्र कर्म का प्रायश्चित्तिरिति।**

**यस्याग्निहोत्रमधिश्रितममेध्यमापद्येत किं तत्र कमर्म का प्रायश्चित्तिरिति।**[43]

शतपथब्राह्मणे त्रयोदशे काण्डे राष्ट्रस्य समृद्ध्यै किञ्चिदविज्ञानं प्रोक्तम्।

यजुर्वेदस्य सुप्रसिद्धमन् :त्र - राष्ट्रोपासनायां पठितः। प्रायेण कर्मकाण्डे आशीर्वाद प्रदाने मन्त्रस्यास्य पाठः श्रूयते :

आब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायताम् –

अस्मिन् मन्त्रे राष्ट्रस्य समृध्यर्थं एका विशिष्टा धेनु भवति। :पाठिता। सा च दोग्ध्री धेनु :

अस्य ब्राह्मणम् अत्र –

"दोग्ध्री धेनुरिति। धेन्वामेव पयो दधाति तस्मात् पुरा धेनुदोग्ध्री जज्ञे"[44]

शतपथब्राह्मणे चतुर्दशेकाण्डे प्रवर्यप्रकरणे गवां स्तवनं संक्षेपेण कृतम्।

तद्यथा

सरस्वती हि :अथ गामाह्वयति। जघनेन गार्हपत्यं यन्निड पादित एहि सरस्वत्येहीतीडा हि गौरदितिर्हि गौ" गौरथोच्चैराह्वयति

नाम्नाऽसावेह्यसावेहीति त्रि":[45]

अस्य ब्राह्मणस्य भाष्यमपि अत्र अपेक्षते। अथ दैवीभि - धर्मदुही गोराह्वानं विद्यते :संज्ञाभि :

अथ गामाह्वयति। अथ रज्ज्वादानानन्तरं जघनेन गार्हपत्यं यत् गार्हपत्यस्यादूरेण पश्चिमदेशेन गच्छन् अध्वर्युइड एहि : इत्ादिभि। तथा च तैत्तिरीयके गर्गत्रिरात्रे :संज्ञा :त्रिभिर्वाक्यैरुपांशु गामाह्वयति। इडादिति सरस्वती शब्दा गौवैदिका : "इडे रंतेऽदिते सरस्वति प्रिये प्रेयसि महि विश्रुति एतानि अघ्नियै नामानि - सहस्रतमी गां प्रस्तुत्य एवमाम्ना यते[46]

इमां प्रसिद्धिं हि शब्देन द्योतयन् इडादिशब्दागोर्नामानि इति व्याचष्टे। इडा हि गौरिति। अथ लौकिकेन नाम्ना तस्या : आह्वानं विधते अथोच्चैराह्वयति।

अथ देवनामभिराहवानान्तरं असावेहि इति लौकिकेन नाम्ना त्रिरुच्चैराह्वयति। असौ इति अदस् शब्द : । त्रिराह्वानस्य:संबुद्ध्यन्तनामसामान्य निर्देशाभिनयार्थमसाविहीति त्रिराह्वानस्याभिनयार्थमसाविहीति त्रिर्वचनम्। अयमर्थः यत् गौनाम व्यावहारिकं गंगादिकं नाम तत् संबुद्ध्यन्तमुक्त्वा तेन एहीति पदं संयोज्य गंगे एहि इत्येवं प्रकारेण : त्रिराह्वानं

कार्यमिति। एवं द्विविधैर्नामभिधर्मदुहोगोराह्वानं तित्तिरिणा स्पष्टमाम्नातम् इड एह्यदिति एहि सरस्वत्येहीत्याह। एतानि वा - अस्यै देवनामानि देवनामैरेवैनमाह्वयति। असावेडसावेह्यसावेहीत्याह। एतानि वा अस्यै मनुष्यानामनि। मनुष्यनामैरेवैनमाह्वयति।

एवं उभयविधैर्नामभिराहूताया आगतायास्तस्याबन्धनं विधत्ते। तां धर्मदुघां धेन :ु ं आगतां देवयजनदेशं प्राप्तां आदित्यैरास्नासि इति मन्त्रेण पूर्वमुपात्तया रज्ज्वा अभिदधाति बघ्नाति। इन्द्राण्या उष्णीषइति मन्त्रभागस्य तात्पर्यमाह : शिरो वेष्टनं विश्वरूपत :उष्णीष :इन्द्राणी ह वा तत्करोति। इन्द्राणी नाम इन्द्रस्य प्रियतमा पत्नी जाया। तस्यामःअतिशयेन : :उक्तलक्षण :शुक्लकृष्णपीतादिनानावर्णयुक्तत्वेन चित्रभूत इत्यर्थः। तत्तेन मन्त्रभागेन हे रज्जो स :सर्वरूपयुक्त :सर्वरूपतम तमेव उष्णीषं करोति मन्त्रपाठेन :धेनो :असिभवसि इत्याह प्रतिपादयति। अध्वर्युश्च एतत् एतेन मन्त्रेण अस्या :उष्णीष निवर्तयति।

अथ दोहनाय वत्सविसर्जने विद्यते। अथ रज्ज्वा बन्धनान्तरं वत्सं उपार्जति उपसृजति पूषासि इत्यनेन मन्त्रेण। एतन्मन्त्रप्रयोगमुपपाद्य उपसंहरति अयं वै पूषाऽसीतीति। यअयमन्तरिक्षे वायुः पवते अयं खलु पुषा। कुत एतदिति : इदं सर्वं जगत् पुष्यति :खलु वायु :चेदुच्यते। एष पोषयति। यदिदं किं च जगद्वर्षति मेघैश्च आत्मना प्रेरितैवृष्टिं उत्पाद्य : एतासां गवां पोषयिता बर्द्धयिता। तथा च तैत्तिरीयके :सिञ्चति। तस्मात् पोषकत्वात् पूषा इत्युच्यते। अपि च एष एव वायु वत्सापाकरण मन्त्रव्याख्यानरूपे ब्राह्मणे पशूनां वाय्वधीनत्वं स्पष्टमवगम्यते। वायवस्थेत्याह वायुर्वान्तरिक्षेस्याध्यक्ष। : वायव एवैनान् परिददाति इति। यस्मादेवं तस्माद् वत्समुपसृजन् अध्वर्युः पूषासि इति मन्त्रं :खलु वै पशव :अन्तरिक्षदेवत्या ब्रूयात्।

इदमन्त्रावधेयं भवति यत् गोदोहनात् प्राक् वत्सस्य कृते दुग्धपानं विहितम्। वत्सतं वत्सं :आदौ धयति अनन्तरं च दोहक : - :पृथक् संस्थाप्य दोहनं संपादयेत्। यथा चाह श्रुति

इदमन्त्रावधेयं भवति यत् गोदोहनात् प्राक् वत्सस्य कृते दुग्धपानं विहितम्। वत्सतं वत्सं :आदौ धयति अनन्तरं च दोहक : - :पृथक् संस्थाप्य दोहनं संपादयेत्। यथा चाह श्रुति

अ"थोन्नयति। घर्माय दीष्वेत्येष वा अत्र घर्मो रसो भवति यमेषा पिन्वते तस्मै दयस्वेत्येवैतदाह"[47]

अयमर्थ वत्सस्य पुनर्बन्धनं विद्यते। :

अथोन्नयति घायदीष्वेति। वत्समुपसृज्य प्रस्तुतायां गवि अथ अनन्तरं घर्माय दीष्व इति मन्त्रेण वत्सं उन्नयति उत्कृष्य ऊधअथ एतत् व्याचष्टे। एष वा अत्र घर्मो रसो भवति यं पय आत्मकं रसं एषा :प्रदेशात् अन्यत्र नयति पुरतो बध्नातीत्यर्थ :

पिन्वते सिंचति दुग्धे एष :गौएव रसोऽत्र अस्मिन्मन्त्रे धर्मभवति तस्मै रसाय तादर्थ्य चतुर्थी। रसात्मकं :धर्मशब्दाभिधेय : दधस्व देहीति इयमेवार्थं एतन्मन्त्रवाक्यमाह। :धर्मोयुक्तं पय

वत्स गोदु :बन्धनं कृत्वा सावधानेन गो दोहनं विधेयं। यदि परोक्षे वत्सस्य बन्धनं क्रियते चेत् सा गौ :पुरत :ग्धदाने असमर्था भवति। :स्यात्। तथा क्षीरस्य च हानि :

गौदोहन विषये -

प्रत्यघत्तान्तावेवैततद्य प्रीणाति :अथ पिन्वने पिन्वयति अश्विभ्याम्पिन्वस्वेत्यश्विनावेवैतदाहाश्विनौ वा एतद्यज्ञस्य शिर" तस्मादादाहाश्विभ्यां पिन्वस्वेति।।

सरस्वत्यै पिन्वस्वेति। वाग्वै सरस्वती वाचा वा एतदश्विनौ यज्ञस्य शिरप्रत्यघत्तान्तावेवैतत् प्रीणातितस्मादाह सरस्वत्यै : पिन्वस्वेति।

इन्द्राय पिन्वस्वेति। इन्द्रो वै यज्ञस्य देवता सा यैव यज्ञस्य देवता तयैवैतदश्विनौ यज्ञस्य शिरप्रत्यघत्तान्तावेवैतत् प्रीण :ाति तस्मादाहेन्द्राय पिन्वस्वेति।[48]

अयं भावअनन्तरं दोहनं विधत्ते। अथ वत्सापानन्तरं पिन्वने दोहनपात्रे पिन्वयति सेचयति गां दोग्धि। अश्विभ्यां इति : मन्त्रेण। अस्य मन्त्रप्रथमभागस्य तात्पर्यमाह। यज्ञस्य एतत् छिन्नं शिरः। अश्विनौ खलु देवौ पुरा प्रत्यधत्तां स ंधानं कृतवन्तौ एतत् एतेन मन्त्रेण तावेव प्रीणाति तर्पयतीत्यर्थः। यस्मादेवं तस्मात कारणात् अश्विभ्यां इति वाक्यं ब्रूयात्।

अथ द्वितीयं भागमनूद्य व्याचष्टे। सरस्वत्यै पिन्वस्वेति। अत्र सरस्वत्यै इति सरस्वतीशब्देन वागेव उच्यते। अश्विनौ हि वाचा मन्त्ररूपया खलु पुरा यज्ञस्य एतच्छिरसंघानभूतां तामेव वाचं एतेन सरस्वत्यै पिन्वस्व इति :यज्ञशिर :प्रत्यघत्ताम्। अत : मन्त्रभागेन प्रीणाति तर्पयति।

अथ तृतीयभागमनूद्य व्याचष्टे -

इन्द्राय पिन्वस्वेति। इन्द्रः एव खलु यज्ञस्य सोमयागस्य प्रधानभूता देवता। कात्स्न्ये न माध्यं दिनसनभावत्वात्। तद्धि यज्ञस्य शरीरम्। गृहस्य पृष्ठवंशस्थानीयैः पृष्ठस्तोत्रैउपेतत्वात्। तस्मात् सा तादृशी या एब यज्ञस्य देवता तयैव देवतया : प्रत्यधत्ताम्। अतस्तामेव देवतां एतदेतेन मन्त्रभागेन प्रीणाति तर्पयति। यस्मादेव तस्मा :साधनभूतया अश्विनौ यज्ञस्य शिरत् देवता प्रतिपादकं इन्द्राय पिन्वस्व इति मन्त्रवाक्यं ब्रूयात्।

अथ दोहनसमये सर्वतदोहनसमयोत्पन्नान् :प्रसृतानां विपुषामभिमन्त्रणं विधत्ते। स्वाहेन्द्रवत् इति मन्त्रं त्रिर्बुवन् विप्रुष : बिंदून अभिमन्त्रयते। तत्र इन्द्रशब्दस्य तात्पर्यमाह इन्द्रो वै यज्ञस्य देवता सोमेवैतत् प्रीणाति इति।

गोदनं कर्म यज्ञे विधिपूर्वकं क्रियते। मन्त्रेण स्तनमालभते। दुग्धं तावत् स्तनमध्ये निहितं भवति प्रार्थनया स्तुत्या च तदुग्धं बहिः नि - सरति। विधिहीनं कर्म यज्ञस्य माहात्म्यं फलं च नाशयति गीतायां च एष भावा प्रकटिता:

विधिही"नमसृष्टान्नं मन्त्रहीनमदक्षिणम्।

श्रद्धाविरहितं यज्ञं तामसं परिचक्षते।।[49]

तस्मात् श्रौतसूत्रस्य भावं स्वीकृत्य कार्यं सम्पादनीयम्। उक्तं च कात्यायनेन -

"यस्ते स्तन इति स्तनमालभते"[50]

तथा च शातपथीश्रुति :

अथास्यै स्तनमभिपद्यते। यस्ते स्तनशशयो यो मयोभूरि :ति यस्ते स्तनो निहितो गुहायामित्येवैतदाह यो रत्नधा वसुविध : सुदत्र इति यो घनानान्दाता वसुवित् पणाय्यऽ इत्येवैतदाह येन विश्वा पुष्यसि वार्याणीति येन सर्वान्देवान् सर्वाणि भूतानि बिभर्षीत्येवैतदाह सरस्वति तमिह धातवेऽकरिति वाग्वै सरस्वती सैषा धर्मदुधा यज्ञो वै वाग्यज्ञमस्मभ्यम् प्रयच्छ येन देवान् प्रीणामेत्यैवैतदाहाथ गार्हपत्यस्यर्द्धमैत्युर्वन्तरिक्षमन्वेमीत्यसावेव बन्धुः।।[51]

अयं भावइति मन्त्रेण अभिमृशेदित्यर्थः। :स्तनं अभिपद्यते आलभेत्। यस्ते स्तन :धेनो :विपुड् अभिमन्त्रणानन्तरं अस्या : अथ अस्य उपात्तस्य मन्त्र प्रथमभागस्य तात्पर्य व्याचष्टे। हे धर्मरूप धेनो ते तव स्तनगुहायां अस्माभिरदृश्ये : :स्तन :एतन्मन्त्रवाक्यमाह। अथ द्वितीयभागमनूद्य व्याचष्टे। य (इममेवा :निक्षिप्तो बभूव। योऽयमर्थ :दिव्येऽवस्थाने निहित रत्नघा रत्नानां रमणीयानां धनानां धाता दाता। वसुवित् वसूनां कनकरजतादीनां वेदिता लंभयिता। यशोभनदाता :सुदत्र : एवं गुणविशिष्टो हि पुरुषो लोके स्तूयते इति एवंरूपमेवार्थमेतन्मन्त्रवाक्यमाह। अथ :स्तुत्य :अत एव पणाय्य चतुर्थपादमनूद्य व्याचष्टे। अथ प्रतिपाद्यमाना सरस्वती वाग्वै वागात्मिकैव न तु नदीरूपा। सैव सरस्वतीएषा धर्मदुधा धर्मस्य धर्मार्थस्य पयसदोग्ध्री धेनुः। सरस्वत्येहि इ :

:त्याह्वानमन्त्रे तस्यास्तादात्म्यप्रतिपादनात् सात्र वाक् यज्ञो वै यज्ञ एव। स्तुतशस्त्रादिरूपया तयैव तस्य निष्पाद्यत्वात्। अत प्र :यज्ञं अस्मभ्यं प्रयच्छ। येन खलु यज्ञेन वयं देवान् हविर्भुजीणाम तपयमि इति अमुमेवार्थमेतन्मन्त्रवाक्यं

सरस्वतिशब्देन प्रतिपादयति। यद्यपि इह हे सरस्वति। तथाविधम् उक्तलक्षणं त्वदीयं स्तनं इहास्मिल्लोके धातवे धातुं पातुं अकब्राह्मणे व्याख्यायते। एवं दुग्ध :अर्थ :प्रतीयते। तथापि सरस्वतिशब्दसूचित :कुरु। इति मन्त्रार्थ :्वा उत्थाय होत्रा इत्युच्यमाने गार्हपत्यं समीपं गच्छेत् इत्याह। अथ दोहनान्तरं गार्हपत्यं उर्वन्तरिक्षं इति मन्त्रेण गच्छेत्। "उपद्रव पयसा" - । तथा च कात्यायनेनोक्तम्:बंधुबंधक :असावेव खलु अग्नि

"उपद्रव पयसेत्युच्यमाने गच्छत्युर्व्वन्तरिक्षमिति"[52]

एवं प्रकारेण गवां महत्वं ब्राह्मणग्रन्थेषु प्रतिपादितम्। एतेरेयब्राह्मणे छन्दसां महत्वं प्रकटयन् समासेन गवां महत्वमुपदिष्टम्। गोपथ ब्राह्मणे प्रायेण शतपथ ब्राह्मणस्यैव पक्ष। सामवेदस्य सन्ति अनेकानि ब्राह्मणानि तेषु :प्रकारान्तरेण समुपदिष्ट : क्वचित् सृष्टिप्रक्रियायां गवां वैशिष्ट्यम् भणितम्। गानप्रक्रियायां च गौसाम श्रूयते। पर्यालोचनेन गवां वैशिष्ट्यं सर्वत्र ग्रन्थेषु भणितमस्ति।

आरण्यकग्रन्थेषु गोतत्त्वविमर्श :

आरण्यकग्रन्थ। किमिदमा:अपेक्षित :। अस्य आरण्यकस्य सामान्येन प्रथमं परिचय:ब्राह्मणग्रन्थान्तर्गते पठित :रण्यकम् - सम्प्रति ब्राह्मणशेषवत् ग्रन्थान्ते पठितोऽस्ति। :आरण्यकग्रन्थ

एकत्र ब्राह्मणग्रन्थे बहुविधान :तत्रैव आरण्यके अध्यात्मयज्ञस्य महत्वं भवति। अनेन द्रव्ययज्ञस्य अनादर :द्रव्ययज्ञा : शु :किन्तु द्रव्ययज्ञादेव पाञ्चभौतिकशरीरस्य बाह्याभ्यन्तरत :प्रकटितद्धिरिष्यते। कामानां सिद्धिप्रथमं :भोगानां प्राप्ति : अध्यात्मयज्ञं प्रविशति। वाक्यान्तरेण वक्तुं शक्ये स्थूलात् सूक्ष्मस्यावाप्तिः। :जन :द्रव्ययज्ञेन सिद्ध्यति। द्रव्ययज्ञात् श्रान्त तत्रा :प्रतिभाति। अभुक्तकाम :निरर्थक :अतृप्तकामस्य अध्यात्म यज्ञे प्रवेशपि तं जनं हठात् भोक्तुमुद्वेलयति प्रेरयति च। अतसर्वप्रथमं :वर्तते मनुष्य :विपरीत :काल :। अद्यतनीय:निश्चेतव्य :द्रव्ययज्ञस्य सम्यगनुष्ठानं कृत्वा अध्यात्मयज्ञे प्रवेश : आत्मवादस्यैव चिन्तने रतो विभाति। सर्वत्र कथा प्रसंगे आत्मतत्वचिन्तनस्य वार्ता प्रामुख्येन प्रसारयति जीवनस्य प्राथमिकं महत्वमपि न वेत्यसौ कथं ब्रह्मज्ञानी भूत्वा स्वयं भ्रष्टसांसारिकान् वञ्चयितुं आत्मानं प्रदर्शयति। तस्मादत्र : वदामि वानप्रस्थानां संन्यासिनां च कृते आरण्यकं उत्पन्नम्।

आरण्यकमित्यत्र अरण्य शब्दात् भवार्थे वुञ् प्रत्ययभवति त :ेन आरण्यकमिति निष्पन्नम् अर्थात् अरण्ये भवम् आरण्यकम्। सदाशिव वामन आप्टे स्वकीये संस्कृत अंग्रेजी कोश ग्रन्थे आरण्यक शब्दस्य अर्थं प्रतिपादितवान् तस्य

भावविद्यते। अस्य ब्राह् :ग्रन्थ :कश्चित प्रौढ :धार्मिकदार्शनिक निबन्धाभ्यां संपृक्त - आरण्यकम् - वर्तते :मणसाहित्येन सह संबद्धः अस्ति। अरण्येऽनूच्यमानत्वात् आरण्यकम्।

अरण्येऽध्ययनादेव आरण्यकमुदाहृतम्।।

अत्र विचारणीयोऽयं अरण्य शब्द :लक्षणया अरण्य शब्द :कोशग्रन्थे वनस्य पर्यायत्वेन पठित :। अभिधया अरण्यशब्दः गृहेऽपि भवितुमर्हति। अस्माकं :। एकान्त:विषयोऽत्र विवेचित :चिन्तनं अभ्यासश्च एकान्ते संभवति। अतिगभीर गृहे स्थित्वा एव ग्रन्थ :आचार्या :सायणाचार्य प्रभृतयग्रन्थिभेदका :एतादृश :न श्रूयते। अत :अभवन्। तेषामरण्ये वास : - आरण्यकम् :ग्रन्थविशेष

अरण्याध्ययनादेतत् आरण्यमितीर्यते।

अरण्ये तदधीयतेत्येवं वाक्यं प्रवक्ष्यते।।

महाभारते शान्तिपर्वणि व्याख्यातं यथा दहननवनीतमुत्पद्यते मलयाचलात् चन्दनम् औषधीभिश्चामृतम् त :थैव वेदेभ्य आरण्यकम् इति ज्ञेयम्।

नवनीतं यथा दहन मलयाच्चन्दनं यथा। :

आरण्यकं च वेदेभ्य औषधिभ्योऽमृतं यथा।। :

आरण्यकेषु सकामकर्मणां प्रायेण अभावदृश्यते। अध्यात्मचिन्तने सर्वत्रास्य गतिर्भवति। बोधायनधर्मसूत्रे आरण्यकस्य : - ब्राह्मणसंज्ञा कृता

विज्ञायते क"र्मादिष्वेतैर्जुहुयात् पूतो देवलोकान् समश्नुते इति हि ब्राह्मणमिति हि ब्राह्मणम्।

आरण्यकस्य रहस्यमपि संज्ञा कृता -

एवमिमे सर्वे वेदा निर्मिता"सान्वाख्याता :ऐतिहासा :सोपनिषत्का :सब्राह्मण :सरहस्या :सकल्पा :[154]अस्य ग्रन्थस्याध्ययनाधिकारी ब्रह्मचर्यव्रतधरः कश्चिद्भवति। एतदारण्यकं सर्वं नाव्रती श्रोतुमर्हति।

अस्याध्ययनं ग्रामे उतवारण्ये भवति स्म। यो निश्चितनोतीत्यध्याहारः। स पुमानात्मानमतिशयोऽऽविर्भूतमुपास्ते। कथं स्थावरजङ्गमजीवयोराविर्भा वातिशय इति चेदुच्यते। ओषधिवनस्पतिषु स्थावरजीवशरीरेषु रस आर्द्रत्वं तदेतज्जीवात्मनो

लिङ्गम्। न हि काष्ठपाषाणादिषु रसोऽस्ति। यदपि प्राणभृत्सु जङ्गमजीवशरीरेषु चित्तमन्तकरणं तदपि जीवात्मनो : सिद :लिङ्गम्। तच्च मृत्पाषाणादिषु न दृश्यते। अतो रस चित्तजीवलिंगयो दर्शनादोषवतिशयेनाऽऽविर्भाव्ः्धः।

- गवादिपशुषु उक्त वैपरीत्यं दर्शयति"

अथेतरेषां पशूनामशनापिपासे एवाभिविज्ञानं न विज्ञातं वदन्ति न विज्ञातं पश्यन्ति न विदुः श्वस्तनं न लोका लोकौ त एतावन्तो भवन्ति यथाप्रशं हि संभवा"इति :[53]

अयमर्थ । तदेव वैलक्षण्यं:मनुष्यवैलक्षण्यद्योतनार्थोऽथ शब्द :प्रपच्यते अशनाशब्देनाशितुमिच्छोच्यते। अशनायेति पदे यकारस्य लुप्तत्वात्। येयं बुभुक्षया च पिपासा ते एवोमे अभिलक्ष्य पशूनां विज्ञानमस्ति न तु मनुष्यवत् पूर्वविज्ञानकथनादिकम्। ते गवादिपशवएतावन्त एतावन्मात्रविज्ञाना स्तात्कालिक क्षुधादिज्ञान मात्रोपेता भवन्त :ि। तत्र हेतुरुच्यते यथा प्रशं पूर्वस्मिज्ञानकर्मानुष्ठानाधिकारयुक्ते जन्मनि यादृशी प्रज्ञा शास्त्रीया लौकिकी वाऽभ्यस्ता। कर्मणोऽप्येतदुपलक्षणम्। कर्मापि विहितं प्रतिषिद्धं वा यादृशमनुष्ठितं तादृशीं प्रज्ञां तादृशं कर्मचानतिक्रम्य यस्मात् संभवा : प्राणिनां जन्मानि भवन्ति। तस्मात् ज्ञानकर्मानुसारेण पशूनां बुद्धिमानं युक्तम्। एतदेवाभिप्रेत्य परलोकगामिनं जीवं प्रति वाजसनेयिन आमनन्ति -'तं विद्याकर्मणि समन्वारभेते पूर्वप्रज्ञा च इति पुण्यो वै पुण्येन कर्मणा भवति पापपापेन इति च। : तदेवं मनुष्यदेहस्योत्तमोपाधित्वात्ुतुमोपाधयस्तथापि मनुष्यस्यैव प्रायेण शास्त्राधिकारित्वात् -

पुरुष एवोक्तमयमेव महान् प्रजापतिः।

आरण्यके गूढं रहस्यमेव चर्चितम्। अनेन प्रकारेण आरण्यकं गवां भौतिकं कलेवरं नैव मीमांसितम्। क्वचित् संक्षेपेण अध्यात्मरीत्या प्रतिपादनं दृश्यते। अस्माकं शोधप्रबन्धे तादृशस्य चिन्तनस्य प्रायेण प्रयोजनं नास्ति। तस्मात् यत् किञ्चित् प्राप्तं विज्ञानं तत्र तत् सर्वं यथाज्ञानमुपन्यस्तम्।

आरण्यकन दृश्यते। आरण्यकानां संख्याऽपि न्यूना एव। रहस्यात्मको विषय उभयत्र ग्रन्थेषु :उपनिषदोर्मध्ये विषयगतो भेद-ग्रथितः। तस्मात वृहदारण्यकम् एकं आरण्यकमपि भवति उपनिषच्च। स्वातन्त्र्येण क्वचित भेद श्रूयते। :

उपनिषद् ग्रन्थेषु गोतत्त्व विमर्श :

उपनिषद् शब्दस्य व्युत्पत्तिलभ्योऽर्थ - विचार्यते। शैवभाष्यभूमिकायां परिभाषा काचनकृता तामेवात्र उपस्थाप्यते :

उपनिभ्यां सदेर्धातोक्विपि चोपनिषन् :मता।

अन्तर्भावितण्यन्तस्य सदेर्विशरणादिषु।।

केचिन्नर्थेषु मन्यन्ते इदं रूपं तु संभवात्।

अनया ब्रह्मसामीप्यमुपवेष्टुं हि साधकाः।।

अर्हा भवन्ति क्षिप्रं यत् ते नैवोपनिषन्मता।

यद्वा सामीप्यमायातां सर्वभावेन वै नृणाम्।।

शिथिलयति दुःखानां समूहं प्रथमं यतः।

अविद्याहेतुकान् क्लेशान् निषादयति तत्क्षणात्।।[54]

ततो गमयति ब्रह्म तेन सोपनिषन्मता।।१ उपनिषदि शब्दे उप नि उपसर्गों षद्लु विशरणगत्यवसादनेषु इत्यर्थेषु षद् धातुश्च। सत्युपसर्गे धात्वर्थाउपनिषद्यते प्राप्यते - प्रद्योतन्ते प्रकाशन्ते वा। शब्दस्तोममहानिधौ उपनिषद् शब्दस्य व्याख्याने प्रोक्तं : ब्रह्मविद्या अनयः ा

इति[55]

तथा च शांकरभाष्ये मुण्डकोपनिषदि सन्तस्तेषां :सरा :य इमां ब्रह्मविद्यां उपनयन्त्यात्मभावेन श्रद्धभक्तिपुर - गर्भजन्मजरारोगाद्यनर्थपूगं

निशात्यति परं ब्रह्म वा गमयति अविद्यादि संसारकारणश्चात्यन्तमवसादयति विनाशयतीत्युपनिषद्।

उपनिषत्सु गवां महत्वं रहस्यात्मकेन रूपेण परिबृंहितम्। यथा छान्दोग्योपनिषदि -

"पुरुषो निधनम् :प्रतिहार :प्रस्तावो गाव उद्गीथोऽश्वा :पशुषु पञ्चविधं सामोपासीताजा हिंकारोऽवय"[56]

अयमर्थसामगानमध्ये क्रियते अस्य वर्गीकरणम् अधस् :भवति। हिंकार :सामगानस्य गानभेदेन कश्चित् विशिष्ट क्रम :तनेन रेखाङ्कनेन भवति -

1. हिंकार अजा - :

2. प्रस्ताव :अवि - :

3. उद्गीथ :गाव - :

4. प्रतिहार :अश्वा - :

5. निधनम् :पुरुष -

हिंकारादयपञ्च सामवेदस्योच्चारण प्रक्रियायां वैशिष्ट्यं विदधति। :

तत्रापि उद्गीथस्य सम्बन्ध गवा साकं वर्तते। :

चतुर्थेऽध्याये जानश्रुतिपौत्रायणस्य एक - प्राप्यते। यस्मिन् पट्शतानि गवां विषये चर्चा प्रचलति :संवाद :

तदुह जानश्रुतिषट्शतानि गवां निष्कमश्वतरीरथं प्रतिचक्रमे तं हाभ्युवाद। रैक्वेमानि षट् शतानि गवामयं :पौत्रायण : निष्कोऽयमश्वतरीरथो नु म एतां भगवो देवातां शाधि यां देवतामुपास्य इति।।

तमु ह परसहस्रं गवां निष्कमश्वतरी :पौत्रायण :प्रत्युवाचाह हारे त्वा शूद्र तवैव सह गोभिरस्त्विति तदुह पुनरेव जानश्रुति : रथं दुहितरं तदादाय प्रतिचक्रमे।

अस्मिन्नेवाध्याये सत्यकाम जाबालस्य कथा भवति। सत्यकाम जावालगौतमस्याश्रमे गत :्वा विद्याप्राप्त्यर्थं प्रार्थनाञ्चकार गौतम – सत्यकामस्य प्रार्थनाम गीकृत्य परिचयं पप्रच्छ :

तं होवाच किं गोत्रो नु सौम्यासीति स होवाच नाहमेतद्वेद भो यद्गोत्रोऽहमस्म्यपृच्छं मातरं सा मा प्रत्यब्रवीद्बध्वहं चरन्ती परिचारिणी यौवने त्वामलभे साहमेतन्न वेद यद्गोत्रस्त्वमसि जबालां तु नामास्मिसत्यकामो नाम त्वमसीति सोऽहं सत्यकामो जाबालोऽस्मि भो इति।

तं होवाच नैतदब्राह्मणो विवक्तुमर्हति समिधं सोम्याहरोप त्वा नेष्ये न सत्यादगा इतितमुपनीय कुशानामबलानां चतुशतां : सोम्यानुसंव्रजेति ता अभिप्रस्था :गता निराकृत्योवाचेमापयन्नुवाच नासहस्रेणावर्तयेति स ह वर्षगणं प्रोवास ता यदा सहस्रं संपेदुः।।[57]

अयं भावगौतमाय सर्वं सत्यभाषणं मात्रा यदुक्तं निवेद्य गौतमात् आदेशं प्राप्य कार्य संपादितवान्। :स सत्यकामो जाबाल : सत्यकामस्य विशुद्धं सत्यं श्रुत्वा ब्राह्मणकुलोत्पन्नोऽयं इति :गौतम विनिश्चित्य उपनयनं च कारयित्वा गाश्चारणाय पालनाय तमुपदिदेश। गोसहस्रेषु कृशानां गवां चतुशत संख्याकानां पृथक् कृत्य तस्मै प्रियच्छात्राय शिष्याय : कर्तव्यः। तथा :तावत् वनमध्ये वास :न भवेयु :आसीत् यावत् इमा सहस्रसंख्याका :सोपदेशपूर्वकं ददौ। तत्र उपदेश सावधानेन गवां सेवा विधेया। इमागौतमस्य वाचं :कृशाश्च आसन्। परन्तु सत्यकाम :रोगग्रस्ता :गवा :सर्वा :

वर्षैः सहस्रं संपेदुः। अस्यामाख्यायिकायां :परिपालयन् बहुवर्षं यावत् वनमध्ये गोसेवां कुर्वन् जीवनं यापयामास। बहुभि वर्धते। :स्वयमेव जायते। मुखमण्डलस्य कान्ति :भवति। विद्या प्राप्ति :विकास :वैशिष्ट्यं इदं भवति यत् गो सेवयां विद्याया :आचारस्य च तेनैव व्याजेन परिपालनं भवति। भारतस्य प्राचीने गुरुकुले गोपालनं कर्म आवश्यकमासीत्। अन्तेवासिन दृढव्रतोभूत्वा वनमध्ये गोपालनं च :सर्वे नियमेन गोपालनं कुर्वन्ति स्म। सत्यकामो जाबालकार। कदा सहस्रं भविष्यति इति चिन्तां कदाचिदपि न कृतवान्। सद्य एव देवयोगात् एको महान् ऋषभ :गाव :सत्यकाम प्रोवाच सहस्र संख्याका : जाबालो यत्र सायं भवति :। आचार्यकुलं त्वया गोभिः साकं गन्तव्यम्। तत्रैव दिव्यं ज्ञानं तस्मै दत्तवान्। सत्यकाम:सम्पन्ना - स्म तत्रैव

अग्निष्टे वक्तेति सह श्वोभूते गा अभिप्रस्थापयांचकार ता यत्राभि सायं बभुवुः तत्र अग्निमुपसमाधाय गा उपरुध्य " "प्राङ्मुखोपविवेश :समिधमाधाय पश्चादग्ने[58]………….

मार्गमध्ये कतिपयैः दिवसविधेया। आचा :दिव्यज्ञानं प्राप्तवान्। जीवने गासवा सर्वैः मनुष्य :दिविदेवै :र्य कुलं प्राप्य आचार्यमुखात् सत्यकामस्य प्रशंसा इत्थं वर्तते -

इति भगव इति ह प्रतिशुश्राव। ब्रह्मविदिव वै सौम्य भासि को नु :प्राप हाचार्यकुलं तमाचार्योऽभ्युवाद सत्यकाम" त्वानुशशासेत्यन्ये मनुष्येभ्य इति ह प्रतिजज्ञे भगवाँस्त्वेव मे कामं ब्रूयात्। श्रुतंह्येव मे भगवढ्शेभ्य आचार्योद्येव विद्या विदिता साधिष्ठं प्रापयतीति तस्मै हैवदेवोवाचात्र ह न किंचन वीयायेति वीयायेति"[59] एवं प्रकारेण उपनिषत्सु गवां महत्वं प्रकटितम्।

सन्दर्भग्रन्थाः


1. तत्रैव।
2. शुक्ल यजुर्वेद -17.93
3. शुक्ल यजुर्वेद -17.94
4. शतपथब्राह्मण :

5. शुक्ल यजुर्वेद -18.26
6. शतपथ ब्राह्मण -9.3.3.7
7. शुक्ल यजुर्वेद -18.27
8. शुक्ल यजुर्वेद -28 अध्याये।
9. शुक्ल यजुर्वेद - :31.8
10. शुक्ल यजुर्वेद - :34.21
11. शुक्ल यजुर्वेद 34.22
12. शतपथ ब्राह्मण -7.1.1.5
13. भटभास्कर तैतिरीय संहितायाम् :
14. सायणाचार्य :
15. पू - सूत्रम् .मी.2.1.7 .22-23
16. महाभारतम् उद्योगपर्व -16
17. शतपथ ब्राह्मण -1.1.5.22
18. शतपथ ब्राह्मण 1.6.3.8.1. 36
19. शतपथ ब्राह्मण -1.6.3.8.1.36
20. शतपथ ब्राह्मण -2.2.2.2.4.12
21. शतपथ ब्राह्मण तत्रैव -
22. शतपथ ब्राह्मण -2.2.2.2.4.15
23. शतपथ ब्राह्मण -2.2.2.2.4 .16-17
24. शतपथब्राह्मण -2.2.2.2.4.18
25. कात्यायनधीत सूत्रम् -4.15.8-9-10
26. 'शतपथब्राह्मण -3.1.2.1.2 .13-17

27. शतपथब्राह्मण -3.2.4.3.1.12

28. कात्यायन श्रौतसूत्रम् -7.177.178

29. शतपथ ब्राह्मण -3.2.4.3.1.13

30. शतपथब्राह्मण 3 -.2.4.3. 14

31. शतपथब्राह्मण तत्रैव -

32. कात्यायन श्रौतसूत्र -7.166

33. शतपथब्राह्मण तत्रैव

34. शतपथ ब्राह्माण -3.2.6.3.4.2

35. शतपथ ब्राह्मण तत्रैव -

36. शतपथ ब्राह्मण-4.2.3.2.4.21

37. शतपथ ब्राह्मण -4.3.1.3.4.7

38. शतपथ ब्राह्मण तत्रैव -

39. शतपथ ब्राह्मण तत्रैव -

40. शतपथनाहाण -5.3.1.2

41. शतपथब्राह्मण तत्रैव -

42. शतपथ ब्राह्मण -5.2.5.10

43. शतपथब्राह्मण -5.3.1.3.4.18

44. शतपथब्राह्मण-5.4.6.5.5.35

45. शतपथब्राह्मण -5.4.7.5.5.17

46. 'शतपथ ब्राह्मण -7.4.2.5.2 15-17

47. शतपथ ब्राह्मण-7.4.2.5.2.19

48. शतपथब्राह्मण -7.4.3.5.2.34

49. शतपथ ब्राह्मण-9.1.2.1.2.13

50. तत्रैव

51. 1 शतपथब्राह्मण तत्रैव -

52. 1 शतपथब्राह्मण ' तत्रैव

53. 1 शतपथ ब्राह्मण -11.4.6.6.3.1-2

54. 1 शतपथ ब्राह्मण -12.2.4.4.2

55. 2 शतपथ ब्राह्मण -13.1.9.3

56. 1 शतपथ ब्राह्मण -14.1.5.2.1.7

57. 2 तै-संहिता .7.1.6

58. 1 शतपथ ब्राह्मण 14 -.1.5.2.1. 10

59. 1 शतपथब्राह्मण – तत्रैव